कुरुक्षेत्रेण किं तस्य किं काश्या पुष्करेण च ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
विश्रुतानि बहून्येव तीर्थानि बहुधा न च ।
कोट्यंशेनापि तुल्यानि नामकीर्त्तनतो हरेः ॥
इष्टापूर्त्तानि कर्म्माणि सुबहूनि कृतान्यपि ।
भवहेतूनि तान्येव हरेर्नाम तु मुक्तिदम् ॥
परिहासेऽपि हासाद्यैर्विष्णोर्गृह्णन्ति नाम ये ।
कृतार्थास्तेऽपि मनुजास्तेभ्योऽपीह नमो नमः ॥
स्त्री शूद्रः पुरुषो वापि ये चान्ये पापयोनयः ।
कीर्त्तयन्ति हरिं भक्त्या तेभ्योऽपीह नमो नमः ॥
न देशनियमस्तत्र न कालनियमस्तथा ।
नोच्छिष्टादौ निषेधश्च नाम्नस्तस्य श्रीहरेः ॥
चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥
न कालशौचनियमा न देशाशौचनिर्णयः ।
हरेः संकीर्त्तनादेव नाम्नो नारद मुच्यते ॥
ध्याने कालोऽस्ति दाने च कालोऽस्ति जप-
यज्ञयोः ।
कृष्णसङ्कीर्त्तने कालो नास्त्यत्र पृथिवीतले ॥
किं सांख्ययोगैः किं यज्ञैस्तपोभिः किं करिष्यति ।
चेन्मुक्तिमिच्छेद्भक्तिञ्च कुर्य्याद्गोविन्दकीर्त्तनम् ॥
परदाररतः पापी परहिंसापकारकः ।
मुक्तिमायाति संयुक्तो हरेर्नामानुकीर्त्तनात् ॥
कृष्णनामधनः कृष्णनामग्राही सदा नरः ।
तत्त्वतः कृष्णमाप्नोति कृष्णनामजनप्रियः ॥
हित्वा गोविन्दनामानि सर्व्वकर्म्म करोति यः ।
बन्धाय तस्य तत् कर्म्म न मोक्षाय तु नारद ! ॥
सर्व्वकर्म्म परित्यज्य हरिनाम स्मरेत् सदा ।
यस्तस्य कर्म्मसिद्धिः स्यात् कृष्णनामप्रसङ्गतः ॥
कामांस्त्यक्त्वा मनोभोगान् विषयांश्च चरन्ति ये ।
तेषां दद्यात् परां भक्तिं हरिनामपरायणः ॥
हरिनामरतो भूत्वा सर्व्वकर्म्म परित्यजेत् ।
स सर्व्वपापान् मुक्तो यः पद्मं हित्वोदकं यथा ।
कृष्णनामैव यच्चित्ते देवर्षे तस्य कर्म्म च ।
स लोकान् सकलान् जित्वा तत्त्वतः कृष्ण-
माप्नुयात् ॥
हरिनाम सदा गीत्वा विचरन्ति महीतले ।
न प्राप्नुवन्ति तद्भाग्यं देवा इन्द्रादयोऽपरे ॥
श्रद्धया हेलया ये तु हरिनाम सुमङ्गलम् ।
गायन्त्येकान्तिनश्चित्तेऽच्युतस्तिष्ठति सन्ततम् ॥
एकान्तिनः कृष्णनामाश्रया ये च हरेः प्रियाः ।
यदि स्वधर्म्मत्यजा वेदपारगा न तथा मुने ! ॥
कृष्णनामानि गायन्ति तस्य सेवादिकर्म्म च ।
सदा कुर्व्वन्ति ये विप्र ! तेभ्यो नित्यं नमो नमः ॥
स्तेयी गुर्व्वङ्गनागामी ब्रह्मघ्नो मद्यपः खलः ।
तत्पापेभ्यः स मुक्तोऽस्तु श्रीहरेर्नाम यत्तपः ॥
पूर्व्वजन्मपरित्यक्तो ह्यासक्तः कृष्णनामसु ।
यथात्मा भौतिकाद्देहात् स मुक्तः सर्व्वपातकात् ॥
हरिनाम व्रतं यस्य हरिनाम च यत्तपः ।
स्वयं भवार्णवात् त्राता गोविन्दो मुनिपुङ्गव ! ॥
श्रद्धयाविरतं कृष्णनामगानरतो जनः ।
कुर्य्यात् सदैव सर्व्वत्र तच्चिन्तां कृपयाच्युतः ॥

मात्सर्य्यलोभमोहैश्च कामक्रोधमदैर्युतः ।
सर्व्वोपद्रवो तन्मुक्तः कृष्णनामैव यत्तपः ॥
सर्व्वदोषयुतो विप्र व्याप्तश्चाशेषपातकैः ।
मुक्तः स वृजिनादस्मात् कृष्णनामैव यत्तपः ॥
स्वधर्म्मवर्ज्जितः पापी जीवद्रोही च हिंसकः ।
स मुक्तः सर्व्वपापेभ्यः कृष्णनामैव यत्तपः ॥
विप्रक्षत्त्रियविट्शूद्राः सङ्करान्त्यजजारजाः ।
कानीना गोलकाश्चैव पितुर्जाताश्च देवजाः ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
यद्येते पापिनो विप्र ! महापातकिनोऽपि वा ॥
उपपातकिनश्चातिपापिनो ह्यनुपापिनः ।
भ्रष्टाचाराश्च पाषण्डाः स्वस्वधर्म्मविवर्ज्जिताः
जीवहत्यारता व्रात्या निन्दकाश्चाजितेन्द्रियाः ।
पश्चाज्ज्ञानसमुत्पन्ना गुरोः कृष्णप्रसादतः ॥
ततस्तु यावज्जीवन्ति हरिनामपरायणाः ।
शुद्धास्तेऽखिलपापेभ्यः पूर्व्वजेभ्यो हि नारद ! ॥
नामादेशं रटन्तस्तु श्रीहरेः स्मृतिपूर्व्वकम् ।
महद्भयं यमं जित्वा परं गोविन्दमाप्नुयुः ॥
गृहान्धकूपपतिताः सर्व्वदोषैस्तु संप्लुताः ।
संसारवासनालिप्ताः सर्व्वधर्म्मबहिष्कृताः ॥
मुक्तास्ते सर्व्वतस्तस्मादुच्चरन्तो हरेर्द्विज ।
मृत्योर्म्महद्भये नाम यान्ति गोविन्दमव्ययम् ॥
हरिनामानि तिष्ठन्ति सन्ति वक्त्राणि प्राणिनाम् ।
भवन्ति कर्म्मसम्बद्धा लोका नरकगामिनः ॥
विसृज्य कृष्णनामानि कर्म्ममार्गरता नराः ।
पुनर्जन्म पुनर्म्मृत्युं भ्रमन्तः स्युस्ततस्ततः ॥
कृष्णनामानि गायन्ति कुर्व्वन्ति तस्य सेवनम् !
ते यान्ति वासुदेवस्य स्थानं परममव्ययम् ॥
वर्णाश्रमस्थिता विप्र ! हरिनामपरायणाः ।
तेषां वक्तुं न शक्नोमि महिमानमहं यदि ॥
हित्वा गोविन्दनामानि कर्म्माशेषं करोति यः ।
पथमप्राप्य कृष्णस्य भ्रमते कर्म्मवर्त्मनि ॥
मायामोहितचित्तेन पापिष्ठास्ते नराधमाः ।
त्यक्त्वा कृष्णस्य नामानि भ्रमन्ते सर्व्वयोनिषु ॥
यदृच्छयाश्रया नाम शिक्षया यः स्मरेद्धरेः ।
सर्व्वाघमुक्तो देवर्षे ! सततं कृष्णनामतः ॥
येन तेन प्रकारेण मुकुन्दनामजल्पकः ।
घोराद्भवार्णवात् पूतो मुक्तः स कृष्णनामतः ।
नामाङ्कितं जनं दृष्ट्वा यस्य श्रद्धा भवेद्धरेः ॥
स याति वैष्णवं धाम परमं कृष्णनामतः ॥
दृष्ट्वा प्रणामं कुर्व्वन्ति हरेर्नामाश्रयं जनम् ।
सकलादंहसो मुक्ता मानवाः साधुवज्जनाः ॥
कृष्णनाम सदा गीत्वा विचरेत् कृष्णसन्निधौ
तथ्यं वदामि ते विप्र ! क्रीतस्तस्य जनार्द्दनः ॥
गीत्वा करोति नामानि श्रीहरेः करतालिकाम् ।
विक्रीतोऽहमृतं तस्य वदामि तव नारद ! ॥
एकान्तो नाम गीत्वा तु सन्निधौ नर्त्तयेद्धरेः
सत्यं तस्य हरिः क्रीतो देवतानाञ्च का कथा ।
ये भावगद्गदा भूत्वा वदन्त्यच्युतसन्निधौ ।
तेषां कृष्णः परिक्रीतो ब्रह्मादीनाञ्च का कथा ॥
ये पतन्त्यवनौ गीत्वा हरेर्नामानि गद्गदाः ।
भावेन तेषां गोविन्दः क्रीतो नारद ! नान्यथा ॥

जन्मना ये न गृह्णन्ति कृष्णदीक्षां सतो गुरोः
तेषां न दर्शनं कार्य्यं दूरतः परिवर्जयेत् ॥
कदाचित् यो न गृह्णाति कृष्णनाम भवामृतम् ।
मृतः खरकीलानां स तु योनिषु जायते ॥
देवर्षे ! हरिनामानि भवनिस्तारहेतुनि ।
न गृह्णीयात्तु यो मोहान्मृते स्यात्तदधोगतिः ॥
गुणकर्म्माणि नामानि न गृह्णाति च यो हरेः ।
दर्शनस्पर्शनं चैव ध्रुवं तस्य विवर्जयेत् ॥
मनुष्यजन्म संप्राप्य न नामग्रहणं हरेः ।
कुर्य्यात् कदापि स्वप्ने वा ह्यहम्यः स नराधमः ॥
ध्यानं सत्ययुगे विष्णोः त्रेतायां यज्ञसाधनम् ।
अर्च्चनं द्वापरयुगे हरिनाम कलौ मुने ॥
ध्यानं तपः सत्ययुगे त्रेतायां यज्ञकर्म्म च ।
द्वापरे पूजनं दानं हरेर्नाम कलौ युगे ॥
कलौ भवार्णवोत्तीर्णो मानवो मुनिपुङ्गव ! ।
वर्त्तते यस्य जिह्वाग्रे हरिरित्यक्षरद्वयम् ॥
सर्व्वलोको जितस्तेन कृष्णः प्राप्तः सनातनः ।
सकृदुच्चारितं येन हरेर्नाम चिदात्मकम् ॥
फलं नास्य क्षमो वक्तुं सहस्रवदनो विधिः ।
जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
वर्त्तते यस्य जिह्वाग्रे हरिरित्यक्षरद्वयम् ॥
सत्यं कलियुगे विप्र ! श्रीहरेर्नाम मङ्गलम् ।
परं स्वस्त्ययनं नृणां नास्त्येव गतिरन्यथा ॥”
इति पाद्मोत्तरखण्डे श्रीकृष्णनाममाहात्म्ये ९८ अध्यायः ॥*॥ कलौ दशसहस्रवर्षपर्य्यन्तं पृथिव्यां तस्यावस्थितिर्यथा,—
“शालग्रामो हरेर्मूर्त्तिर्ज्जगन्नाथश्च भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम् ॥
वैष्णवाश्च पुराणानि शङ्खानि श्राद्धतर्पणम् ।
वेदोक्तानि च कर्म्माणि ययुस्तैः सार्द्धमेव च ॥
हरिपूजा हरेर्न्नाम तत्कीर्त्तिगुणकीर्त्तनम् ।
वेदाङ्गानि च शास्त्राणि ययुस्तैः सार्द्धमेव च ॥
सत्त्वञ्च धर्म्मः सत्यञ्च वेदाश्च ग्रामदेवताः ।
व्रतं तपश्चानशनं ययुस्तैः सार्द्धमेव च ॥
वामाचाररताः सर्व्वे मिथ्या कापट्यमेव च ।
तुलसीवर्ज्जिता पूजा भविष्यन्ति ततः परम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ७ । १२—१६ ॥
तस्य स्वरूपं यथा,—

गर्ग उवाच ।

“अये नन्द प्रवक्ष्यामि वचनं ते सुखावहम् ।
प्रस्थापितोऽहं वसुना येन तत् श्रूयतामिति ॥
वसुना सूतिकागारे शिशुः प्रत्यर्पणीकृतः ।
पुत्त्रोऽयं वसुदेवस्य ज्येष्ठस्य तस्य च ध्रुवम् ॥
कन्या ते च येन नीता मथुरां कंसभीरुणा ।
अस्यान्नप्राशनायाहं नामानुकरणाय च ॥
गूढ़ेन प्रेषितस्तेन तस्य यागं कुरु व्रज ॥
पूर्णब्रह्मस्वरूपोऽयं शिशुस्ते मायया महीम् ।
आगत्य भारहरणं कर्त्ता धाता च सेवितः ॥
गोलोकनाथो भगवान् श्रीकृष्णो राधिकापतिः
नारायणो यो वैकुण्ठे कमलाकान्त एव च ॥
श्वेतद्वीपनिवासी यः पाता विष्णुश्च सोऽप्यजः ।
कपिलोऽन्ये तदंशाश्च नरनारायणावृषी ॥